# Go Stavanam

# ગોસ્તવનમ્

## Document Information

Text title : Go Stavanam

File name : gostavanam.itx

Category : devii, devI, otherforms

Location : doc_devii

Author : Gaurishankar Dwivedi

Transliterated by : Charu Champaka

Proofread by : Charu Champaka

Latest update : September 17, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ગોસ્તવનમ્

અવતારો ગવાં શ્રેષ્ઠઃ સર્વેષુ ભુવિ જન્તુષુ ।
યતસ્તાસાં વિકારોઽપિ હ્યુપકારાય જાયતે ॥ ૧॥

ગચ્છન્ત્યઃ સંસ્થિતાઃ સુપ્તાઃ શકૃન્મૂત્રકૃતોઽપિ વા ।
ગાવઃ પુનન્તિ લોકાંસ્ત્રીનતો દેવત્વમાગતાઃ ॥ ૨॥

શુભ્રાઃ પીતાસ્તથા શ્યામાશ્ચિત્રા વૈ લોહિતાસ્તથા ।
કુર્વતે નૃહૃદિ સ્થાનં ગાવઃ પ્રકૃતિશોભનાઃ ॥ ૩॥

લોકેઽમૃતં યથા ક્ષીરં ગોમયં પાવનં પરમ્ ।
આયુર્ઘૃતં તથા ચૈવ મૂત્રં રોગવિનાશનમ્ ॥ ૪॥

અપૂર્વં પઞ્ચગવ્યં ચ તીર્થં કલ્મષનાશનમ્ ।
એષા પરમ્પરા ભવ્યા દુર્લભા સુરભિં વિના ॥ ૫॥

પ્રત્યક્ષ દેવતા ગાવો ગાવો વૈ લોકમાતરઃ ।
તસ્માદર્ચ્યતમા એતા રક્ષણીયાઃ પ્રયત્નતઃ ॥ ૬॥

ગોદાનં ચ પરં દાનં ગોધનં ચ પરં ધનમ્ ।
ગોભક્તિઃ પરમા સિદ્ધિર્ગોસેવા પરમા ગતિઃ ॥ ૭॥

ગાવો યત્ર હિ પૂજ્યન્તે પાલ્યન્તે ચૈવ યત્નતઃ ।
ગોપાલો ભગવાંસ્તત્ર મુદા વસતિ નિત્યશઃ ॥ ૮॥

ગાવો મે પુરતઃ સન્તુ ગાવો મે સન્તુ પૃષ્ઠતઃ ।
ગાવો મે સર્વતઃ સન્તુ ગવાં મધ્યે વસામ્યહમ્ ॥ ૯॥

ગાં વિના ન હિ મે શાન્તિર્ભવેદિહ પરત્ર ચ ।
ઇતિ સઞ્ચિન્ત્ય ભગવાન્ ગોલોકમધિતિષ્ઠતિ ॥ ૧૦॥

અસ્તિ ગોસદૃશં નૈવ ત્રિષુ લોકેષુ કિઞ્ચન ।
યદ્વશે ભગવાન્ વિષ્ણુઃ પશ્ચાદ્ધાવતિ નિત્યશઃ ॥ ૧૧॥

ગોમાતસ્ત્વં હિ ધન્યાસિ ધન્યં ચ તવ જીવનમ્ ।
ધન્યાશ્ચ તે નરા લોકે ત્વત્સેવાવ્રતિનશ્ચ યે ॥ ૧૨॥

ઇતિ ગોસ્તવનં સમ્પૂર્ણમ્ ।

(રચયિતા – પં. શ્રીગૌરીશઙ્કરજી દ્વિવેદી, સાહિત્યરત્ન)

Encoded and proofread by Charu Champaka

*Go Stavanam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*